# आदर्श-प्रश्नपत्रम्

कक्षाः सप्तमी

विषयः संस्कृतः

अंकाः ५०

## अपठित-अवबोधनम्

१. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत- 5

वयं सर्वाणि कार्याणि शरीरेण एव कुर्मः। शरीरम् एव अस्माकं सर्वेषाम् एव कर्त्तव्याणां प्रमुखं साधनम् अस्ति। धर्मस्य पालनस्य साधनम् अस्ति। अतः शरीरेण सदा स्वस्थाः भवेयुः। शरीरस्य स्वास्थाय सन्तुलितभोजनस्य सेवनम् अनिवार्यम्। न केवलम् सन्तुलितभोजनम् अपितु शरीरस्य स्वास्थाय व्यायामः अपि आवश्यकः।

I. एकपदेन उत्तरत- 1/2x2=1

(क) सर्वाणि कार्याणि केन कर्त्तव्यानि ?

(अ) शरीरम् (आ) शरीरेण (इ) शरीरस्य (ई) शरीरात्

(ख) किम् एव अस्माकं सर्वेषाम् एव कर्त्तव्याणां प्रमुखं साधनम् अस्ति?

(अ) शरीरम् (आ) शरीरेण (इ) शरीरस्य (ई) शरीरात्

II. पूर्णवाक्येन उत्तरत- 1x2=2

(क) केन सदा स्वस्थाः भवेयुः?

(ख) शरीरस्य स्वास्थाय किम् आवश्यकम्?

III. निदेशानुसारम् उत्तरत- 1x2=2

(क) शरीरस्य-अत्र का विभक्तिः ?

(अ) प्रथमा (आ) चतुर्थी (इ) षष्ठी(ई) सप्तमी

(ख) कार्याणि- अस्य विशेषणपदं किम् ?

(अ) सर्वम् (आ) सर्वस्य (इ) सर्वाणि, (ई)सर्वात्

## रचनात्मकं-कार्यम्

२.चित्रं दृष्ट्या मञ्जूषायां प्रदत्त-पदानां सहयतया पञ्च वाक्यानि संस्कृतेन लिखत- 5



मञ्जूषा - मयूरः, राष्ट्रियपक्षी, मेघाः, गर्जन्ति, नृत्यन्ति।

३. मञ्जूषायाः पदानि चित्वा वार्तालापं पूरयत- 1/2 x10=5

रूपा- .......(i).....मिते !
मिता- भो रूपे ! त्वं किं .......(ii).....?
रूपा- अहं . .......(iii)..... रचयामि।
मिता- ...(iv)....चित्रं रचयसि?
रूपा- .......(v).... चित्रकथां रचयामि। श्वः मम विद्यालये चित्रकथा-प्रतियोगिता .......(vi).....। अहं तस्यै पूर्वाभ्यासं करोमि।
मिता- एतत् तु अतीव . .......(vii).....।. .......(viii)......त्वं प्रतियोगितां जेष्यसि एषा .......(ix).....कामना अस्ति।
रूपा- .......(x).....।

मञ्जूषा- धन्यवादः, आगच्छ, रचयसि, भविष्यति, मम,, चित्रम्, कस्य, अहम्, शोभनम्, नूनम्।

## अनुप्रयुक्त-व्याकरणम्

४. साधु-शब्दस्य रूपाणि लिखत। 5
५. इदम्-शब्दस्य स्त्रीलिंगे रूपाणि लिखत। 5
६. दृश्-धातोः रूपाणि लृट्-लकारे लिखत। 3
७. पा-धातोः रूपाणि लट्-लकारे लिखत। 3

## पठित-अवबोधनम्

८. रिक्तस्थानानि पूरयत- 1x4=4

तदेकं ...(ii)...तदेकं भजामः
तदेकं जगत् ...(i)... नमामः।
तदेकं ...(iii)... निरालम्बमीशम्
...(iv)...पोतं शरण्यं व्रजामः।।

मञ्जूषा- निधानं, स्मरामः, भवाम्बोधि, साक्षिरूपं।

९. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत- **5**

वीरसिंहः मातुः वचनं पालयति। सः शिरस्त्राणं विना युद्धक्षेत्रम् अगच्छत्। सूर्यप्रकाशः तम् अपृच्छत्- 'केन कारणेन त्वं शिरस्त्राणं न धारयसि?' वीरसिंहः सर्वं वृत्तान्तम् अकथयत्। तदा सः आश्चर्यचकितः अभवत् अवदत् च- ' तव माता धन्या या कपोतशावकानाम् अपि नाशं न वाञ्छति। युद्धे तु असंख्यानां सैनिकानां वधः भविष्यति। अधुना कपोतः शान्तिदूतः अस्ति।'

I. एकपदेन उत्तरत- (केवलं प्रश्नद्वयम्) 1x2=2

(क)सर्वं वृत्तान्तम् कः अकथयत्?

(ख)वीरसिंहः कस्याः वचनं पालयति?

(ग) माता केषाम् अपि नाशं न वाञ्छति?

II. पूर्णवाक्येन उत्तरत- 1

सूर्यप्रकाशः वीरसिंहं किम् अपृच्छत् ?

III. निदेशानुसारम् उत्तरत- 1x2=2

(क) अकथयत्- अत्र कः लकारः ?

(अ) लट् (आ) लोट् (इ) लङ् (ई) लृट्

(ख)'अधुना कपोतः शान्तिदूतः अस्ति'- अत्र क्रियापदं किम्?

(अ) अधुना (आ) कपोतः (इ) शान्तिदूतः (ई)अस्ति

१०. रेखांकितपदानि प्रश्ननिर्माणं कुरुत-(केवलं प्रश्नचतुष्टयम्) 1x4=4

(क) <u>अस्माकं</u> देशः भारतवर्षः।

(ख) <u>भारते</u> सर्वत्र विविधता अस्ति।

(ग) भारते <u>षड्</u> ऋतवः क्रमेण आगच्छन्ति।

(घ) <u>भारतस्य</u> भूभागाः रमणीयाः।

(ङ) भारतीय-संस्कृतिः <u>संस्कृते</u> निहिता अस्ति।

११. विकल्पेभ्यः समानार्थकपदानि चित्वा लिखत- 1x4=4

(क)सरिताः- (कविताः/नद्यः/मालाः)

(ख) भोजनम्- (आहारः/गृहम्/वनम्)

(ग) समग्रम्-(अपूर्णम्/दूरम्/ सम्पूर्णम्)

(घ) जननी-(माता/देशः/भूभागः)

१२. सर्वे भवन्तु सुखिनः-- श्लोकम् इदं लिखत। 2